एवानुग्राहकमादित्यादिकं ज्योतिः” इत्यादित्यस्य चक्षुर्वृत्तेरनुग्राहकतया ज्योतिःपदार्थपरत्वमुक्तम् । ४आदित्यमण्डलान्तर्गते हिरण्मयस्मे परमपुरुषे” विष्णौ “स्वयंभूः शम्भुरादित्यः” विष्णुस० । विष्णोश्चादित्यशब्दवाच्यत्वे कारणमुक्तं भाष्ये यथा “आदित्यमण्डलान्तःस्थोहिरण्मयः पुरुष आदित्यः, द्वादशादित्येषु विष्णुर्वा, “आदित्यानामहं विष्णुरिति” स्मृतेः, अदितेरखण्डिताया महत्या अयं पतिरिति वा “इयं वा अदितिर्मही” “देवी विष्णुपत्नीति” श्रुतेः यथादित्यएकएवानेकजलेष्वनेकवत् प्रतिभासते एवमनेकेषु शरीरेषु एकएवानेकवत् प्रतिभासत इत्यादित्यसाधर्म्याद्वा आदित्यः” तत्र हिरण्मयपुरुषस्य सूर्य्यमण्डलमध्यवर्त्तित्वे च “य एषोऽन्तरादित्ये हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात् सर्वएव सुवर्णः” इति छा०उ० श्रुतिर्मानम् “अथ य एषो ऽन्तरादित्ये आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो नहि सुवर्णविकारत्वम् देवस्य सम्भवति, ऋक्सामगेष्णत्वापहतपाप्मत्वासम्भवात् । नहि सौवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति येन प्रतिषिध्येत चाक्षुषे चाग्रहणात् । अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्म्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात्, पूरयति वा स्वेनात्मना जगदिति । दृश्यते निवृत्तचक्षुर्भिः समाहितचेतोभिर्ब्रह्मचर्य्यादिसाधनापेक्षैः । तेजस्विनोऽपि श्मश्रुकेशादयः कृष्णाः स्युरित्यतो विशिनष्टि हिरण्यश्मश्रुर्हिरण्यकेश इति । ज्योतिर्म्मयान्येवास्य श्मश्रूणि केशाश्चेत्यर्थः” शाङ्करभाष्यम् । उपासकानामतिवाहनाय ईश्वरनियुक्ते अर्च्चिरादिमार्गस्थिते आतिवाहिके ५देवभेदे च “संवत्सरादादित्यमादित्याच्चन्द्रमसम्” छा०उ० । आदित्याश्च द्वादश यथोक्तं विष्णुधर्मोत्तरे भारते च “धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्य एव च । भगो विवस्वान् पूषा च सविता दशमः स्मृतः । एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते” इति विष्णुध० । “धाताऽर्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा । इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यज” इति भा०आ०प० कल्पभेदादनयोर्व्यवस्था । मासभेदे आदित्यभेदा आदित्यहृदये दर्शिता यथा “अरुणो माघमासे तु सूर्य्यो वै फाल्गुने तथा । चैत्रे मासि च वेदज्ञो वैशाखे तपनः स्मृतः । ज्यैष्ठे मासि तपेदिन्द्रः आषाढे तपते रविः । गभस्तिः श्रावणे मासि यमोभाद्रपदे तथा । इषे हिरण्यरेताश्च कार्त्तिके च दिवाकरः । मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः । इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः” । ६अर्कवृक्षे पु० । आदित्यस्यापत्यम् ण्य यलोपः । ७आदित्यापत्ये पुंस्त्री० ।

**आदित्यकेतु** पु० धृतराष्ट्रपुत्रभेदे तद्गणनायां भा०आ०प० ६७ अ० । “आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ” ६त० । आदित्यस्य केतौ अरुणे ।

**आदित्यकेशव** पु० आदित्यपूजितः केशवः । काशीस्थे “केशवमूर्त्तिभेदे “आदिकेशवपूर्व्वेण स्वयमादित्यकेशवः” काशीख० ।

**आदित्यपत्र** पु० आदित्यस्य अर्कवृक्षस्य पत्रमिव पत्रमस्य । क्षुपभेदे । ६त० । अर्कवृक्षपत्रे न० ।

**आदित्यपर्णिनी** स्त्री आदित्यवर्णं नित्यं पर्णमस्त्यस्या इनि । “मूलिनी पञ्चभिः पत्रैः सुरक्ता शुककोमलैः । आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्त्तिनी” “आदित्यपर्णिनी ज्ञेया तथैव हि हिमक्षये” सुश्रुतोक्तलक्षणायामोषधौ ।

**आदित्यपुराण** न० आदित्येनोक्तं पुराणम् । उपपुराणभेदे । उपपुराणगणनायाम् “माहेश्वरं तथा साम्बं सौरं पाराशराह्वयम्” । कौर्म्मे सौरत्वेनेदं पठितम् । मत्स्यपुराणे तु “यत्र साम्बं पुरस्कृत्य भविष्योत्थकथानकम् । प्रोच्यते तत् पुनर्लोके साम्बमेव शुचिव्रतम् । एवमादित्यसंज्ञं च तत्रैव परिपद्यते” आदित्यसंज्ञमित्युक्तं देवीपु० “पराशरोक्तमपरं मारीचं भास्कराह्वयम्” भास्करत्वेनोक्तं तथा चादित्यपुराणस्यैव नामान्तरं सौरं भास्करञ्चेत्यादि । अधिकमुपपुराणशब्दे वक्ष्यते । एतदीयप्रतिपाद्यविषयाः सौरशब्दे दृश्याः ।

**आदित्यपुष्पिका** स्त्री आदित्यवर्णं रक्तं पुष्पमस्याः । रक्तपुष्पे अर्कवृक्षे । [ वल्लभायाम् ओषधौ ।

**आदित्यभक्ता** स्त्री आदित्ये भक्ता । ( हुड्हुड़िया ) अर्क-

**आदित्यव्रत** न० आदित्यस्य तदुपासनार्थं व्रतम् । सूर्य्योपासनार्थे व्रतभेदे । आदित्यव्रतस्य ब्रह्मचर्य्यमस्य ठञ् । आदित्यव्रतिकः तद्व्रतार्थब्रह्मचर्य्ययुक्ते त्रि० ।

**आदित्यसूनु** पु० ६त० । सूर्य्यपुत्रे १सुग्रीवे २कर्णे, ३यमे ४शनैश्चरे च अरुणात्मजशब्दे विवृतिः दृ० ।

**आदित्सु** पु० आ+दा–सन्–उ । ग्रहीतुमिच्छौ, “आदित्सुभिर्नूपुरशिञ्जितानि” कुमा० ।

**आदिदेव** पु० आदौ दीव्यति स्वयं राजते दिव–अच् ७त० । १नारायणे २शिवे । आदिः कारणं देवः । ३आदिकारणे परमात्मनि । “सहास्रात्मा मया योव आदिदेव